श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सेवा श्री श्रीनिवासराघवार्य महादेशिक विरचितम्

# ॥ श्रीलक्ष्मीनारायणस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीनारायणस्तोत्रम् ॥

सत्यव्रतक्षेत्रललामभूतो
बाहासरित्तीरविराजमानः ।
मखिप्रकृष्टोह्यरशाणिपालै
नारायणो यत विभाति लक्ष्म्या ॥ १ ॥

आत्रेयगोत्रांबुधिपूर्णचन्द्रैः
आचारशीलैरभितो वरिष्ठैः ।
आशास्यमानः परभक्तियुक्तैः
नारायणो भाति सहैव लक्ष्म्या ॥ २ ॥

श्रीवैष्णवाग्रेसरमाननीयाः
आचार्यवर्या जगति प्रसिद्धाः ।
सत्संप्रदायावनबद्धदीक्षाः
त्वया प्रदात्ता जगतां विभान्ति ॥ ३ ॥

भाग्यं जगत्यामुपवर्णनीयं
त्वदीयसेवाफलमामनन्ति ।
अस्तोकदिव्याध्वरवेदिभोग्ये
जानेऽग्रहारे तव भाग्यमेतत् ॥ ४ ॥

इष्टार्थसिद्ध्यै भवतोपदिष्टं
इष्ट्यादिकं भूरि कृतं हि यत्र ।
यज्ञो हि नारायणनामरूपः
त्वमत्र भासीति विभावये त्वाम् ॥ ५ ॥

आत्रेयगोत्रैकजनिप्रकृष्टाः
द्विजा द्विजत्वं प्रतिपद्यमानाः ।

www.prapatti.com

भूयस्तरां विष्णुपदे चरन्तः
विभान्ति तुष्टस्त्वमिहासि भूत्यै॥ ६ ॥

नारायण त्वं रमया समेतः
प्राचीं दिशं वीक्ष्य मुहुः प्रसन्नः।
कुतो न जाने परमं रहस्यं
यूपोज्वलं स्तम्भमवेक्षसे किम् !॥ ७ ॥

यज्ञस्य साक्षी स्थिर एव लोके
यज्ञस्थली चापि विभाति सुस्था।
ततोऽभिजातावसतोऽग्रहारः
विश्वप्रसिद्धोऽप्यधुना त्वयैव॥ ८ ॥

काञ्च्युत्तराचोत्तमतां प्रणीता
यज्ञैर्हि सज्ञैः किल यायजूकैः।
अत्र्यन्ववायान्वयविद्वदग्र्यैः
सुस्वध्वरैरध्वरवेदिदीप्रैः॥ ९ ॥

श्रीवादिहंसांबुदसूरिवर्य
वंशावतंसैः किल विप्रवर्यैः।
श्रीश्रीनिवासाध्वरिभिः प्रतिष्ठां
प्राप्तोऽग्रहारोह्यरशाणिपालै॥ १० ॥

प्रतिष्ठितस्त्वं निजभूम्नि नित्यं
प्रतिष्ठितस्त्वं परमाग्रहारे।
पुनः प्रतिष्ठा भवतः प्रशस्या
चिराय नारायण ! सन्निधत्स्व॥ ११ ॥

यमप्ययं प्राह्वयतिस्म हृष्टो
वरप्रदो वारणशैलमूर्ध्नि।
देवाधिराजोऽप्पयदीक्षितोऽसौ
कूटस्थ एवाभवदत्रिगोत्रे॥ १२ ॥

कल्याणकुल्या कमनीययूपः
काश्यं कुतः प्राप न वेद्मि तत्त्वम्।
क्षमस्व सर्वानपराधवर्गान्
ऋद्ध्यै समीक्षस्व सुधाकटाक्षात्॥ १३ ॥

कल्याणकुल्यामृतवाहिनी स्तात्
यूपः समुच्छ्रायमुपैतु भूयः।
त्वदीयधामोज्वलतामुपेयात्
आराधनं ते नवतां प्रदद्यात्॥ १४ ॥

काञ्चीघटांब्वित्यभिधानभाजः
श्रीवेङ्कटाचार्यमुखाः कवीन्द्राः।
यत्सन्निधानात् अतुलां प्रतिष्ठां
संप्राप्य नारायण संविभासि॥ १५ ॥

दभ्रेतरे धामनि वर्धमानो
दभ्रं परं धाम समाश्रितोऽसि।
अदभ्रदृष्ट्या स्वयमेधमानः
भद्राणि नारायण संविधेयाः॥ १६ ॥

विधिप्रणीते सुभगेऽश्वमेधे
समुद्भवन् श्यामलहव्यवाहः।
अस्तोकभोग्याध्वरहव्यभोक्ता
नयत्यहो तान् स्वपुरं स्म देवः॥ १७ ॥

कलिः प्रदुष्टः कवयोऽपि नष्टाः
कल्याणकुल्याप्यमृतेन हीना।
जाताश्च दूरे सुखजीविकायै
परन्तु नारायण सुस्थिरोऽसि॥ १८ ॥

पूतोऽग्रहारो मखजालकृत्या
पूता स्थली सत्पदरेणुपूर्णा।

पूता वयं ग्रामसुनामधृत्या
    वसेम नारायण ते कटाक्षैः ॥ १९ ॥

श्रीसूक्तहोमेन कृतेन भक्त्या
    ग्रामस्समृद्धिं सकलामुपैतु।
देवस्समाराधनसंप्रहृष्टः
    अभीष्टदायी सततं विभातु॥ २० ॥

अत्र्यन्ववाये जनिमेत्य सेवा
    रतेन मावासरघूत्तमेन।
भक्त्या कृतं स्तोत्रमिदं पठन्तः
    लक्ष्मीकटाक्षेण विभान्तु लोके॥ २१ ॥

लक्ष्मी नारायणं देवं मन्दिरं नूतन निर्मितम्।
रक्षितां यागशालां च दृष्ट्वा तुष्टिं भजेमहि॥ २२ ॥

॥ इति श्रीलक्ष्मीनारायणस्तोत्रं संपूर्णम् ॥

www.prapatti.com